त्वादिषु लक्षणेत्यत्र विनिगमनाभावादुभयोरपि तत्र शक्तिसिद्धिरिति वाच्यम्। संख्यातिरिक्तस्य प्रथमाविभक्तेः शक्यस्याप्रसिद्ध्या तत्र प्र
थमाविभक्तेः संख्यायां लक्षणाया वक्तुमशक्यत्वात्। एकस्य संबंधस्यैव लक्षणात्वादिति। तन्न। तत्र प्रथमाविभक्तेः संख्यायां लक्षणा
या वक्तुमशक्यत्वेपि निरुक्तोभयस्य सुबवत्तया विनिगमनाविरहस्य दुर्वारत्वादिति। नन्वेतावता स्यात् द्विवचनादेर्द्वित्वादौ शक्तिः प्राया
स्तु तदेकवचनस्य एकत्वे शक्तौ तु किं मानं तथा च तत्रैव तत्तीया द्वितीया नियमार्थं कर्त्राद्यर्थस्याख्यातया च्वः स्यादित्यत आह ला
घवादिति। सित्वादिना एकत्वादिषु शक्तिकल्पने शक्ततावच्छेदकबाहुल्यापत्त्या लाघवादेकवचः स्यादित्यत आह लाघवादि
ति। सित्वादिना एकत्वादिषु शक्तिकल्पने शक्ततावच्छेदकबाहुल्यापत्त्या लाघवादेकवचनत एव द्व्येकयोर्द्विवचनैकवचने इत्यनु
शासनं। यद्यप्येकवचनत्वं नैकत्वशक्तत्वं आत्माश्रयात्। तन्नाप्येकत्वबोधकत्वं परमात्रस्यैव लक्षणादिनातिवाहि नामबो
धस्यैव एकत्वात्वादिप्रकारकबोधत्वात्तथापि संकेतविशेषसंबंधेनैकवचनादिपदवत्त्वमेकवचनत्वादि। तान्येकवचनद्विवचन
बहुवचनान्येकशः समनुशासनेन तिङ् सुपेकवचनादिघोषकवचनादिपदस्य संकेतितत्वात्। नचैवं तेन रूपेणाज्ञानं विनापि स्त्वा

दिनाज्ञानादेकत्वादिप्रसंयोन स्यादिति वाच्यम्। विना शक्तिभ्रममिष्टत्वादिति भावः। अत्र नव्याः सिद्धादिनाप्रातिस्विकरूपेण
सुब्विभक्तेरेकत्वादिषु शक्तावपि तिपत्वादिना तिङ्विभक्तेरेकत्वादिषु शक्तिरावश्यकी। चैत्रः पचतीत्यादौ गृहीतसुप्संख्या
शक्तिकानां कस्यचित्तिवादेरेकत्वादिनिष्ठवृत्तिज्ञानादैक्यैकत्वाद्यवबोधो भवतीत्यविवादं तथा च तिवादेः प्रवृत्तित्वे वा शक्तता
वच्छेदकमेकत्वत्वादिकं वैमत्यविनिगमकाभावात्। उभयोरेव तच्छक्ततावच्छेदकत्वसिद्धिः। एकत्वत्वादेः शक्ततावच्छेदकत्वेपिप्र
वृत्तित्वप्रकारे शाब्दबोधस्य लक्षणादिना सुवचत्वात्प्रवृत्तित्वप्रकारकतिवादिजन्यबोधस्यैव एकत्वत्वादिप्रकारकतज्जन्यबोधस्या
पि स्वारसिकत्वस्य सकलशास्त्रार्थी। कल्पितत्वात्। अन्यथा बोधस्य स्वारसिकत्वमादायपि विवादिपर्यादिपदस्यापि प्रत्येकमादाय
विनिगमनाविरहे शालायवादिशक्त्यादेरेव शक्ततावच्छेदकत्वापत्तेः। नानार्थोच्छेदापत्तेश्च। एवं च प्रथमैकवचनद्विवचनब
हुवचनानां वा एकत्वद्वित्वबहुत्वेषु शक्तिः तिङेकवचनद्विवचनबहुवचनानां वैमत्यविनिगमनाविरहात् एकत्वादिषु शक्तिः
शक्तिसिद्धिः किंच चैत्रः पचतीत्यादावगृहीतसुप्संख्याशक्तिकानां कस्यचित्तिवादेरेकत्वादिनिष्ठवृत्तिज्ञानादैक्यैकत्वादिबोध
स्य सर्वसिद्धत्वात्। न च तत्र वृत्तिज्ञानं लक्षणाज्ञानं स्वरूपं शक्तिभ्रमरूपं वेति वाच्यम्। तद्वृत्तिज्ञानं वा लक्षणाज्ञानादिरूपं प्रथ
मैकवचनादेरेकत्वादिषु वृत्तिज्ञानं वा शक्तिभ्रमरूपमित्यत्र विनिगमकाभावात्प्रत्येकमादाय विनिगमकाभावेन तिङेकव
चनादेर्वा कल्प्यस्य किंचित्करत्वादिति प्राहुः। केचित्तु केवलात्पचति पचतः पचन्तीत्यादितः तिङः कर्त्रादिलक्षणादिनावेय। करणाम
तेतिङः शक्यतावच्छेदकः पाककर्तृत्वादिषु विशेषभवसिद्धत्वात् संख्यायां तस्यैकत्वाद्यो शक्तिसिद्धिः न वनैव एकत्वादिविशिष्ट कर्तरि
वलक्षणा शक्तिभ्रमो वेति वाच्यम्। केवलकर्त्रादिलक्षणादिनापि तत्। इत्थं बोधस्यानुभवसिद्धत्वादित्याहुः। केचित्तु वारितिष्ठति राम ११

स्वप्तिङ्तिङ्स्मारो विनापि सुपः प्रतिसंधानमेकत्वादिप्रतीतेरेकत्वादिष्वतिङः शक्तिरित्यप्याहुः अकृतेति। तथा च चैत्रेणादृष्टो
घट इत्यादावपि कर्मणि द्वितीयाप्रथमा। चैत्रः पक्तेत्यादावपि कर्तरि तृतीयाप्राप्त्या प्रथमेति भावः। तथात्वे तु संख्या
भिधानानभिधानेन प्रथमातृतीयादिनियामकं। किं तु प्रत्ययेन कर्तृकर्मणोरभिधानानभिधानमेव तन्नियामकमिति वैयाक
रणानिगर्वः। न चाख्यातस्थले एवं तथा च क्वं। कृत्स्थले तु कर्तृकर्मणोरनभिधानाभिधानाभ्यामेव नियम इत्यत आह।
किं चेति। संख्याभिधानरहितआख्यातजन्यसंख्याप्रकारकबोधस्यार्थः न नियम इति। कृतिशक्तिवादिनो विशेष्यतानि
यामकोनास्तीत्यर्थः। क्वचित्कर्तृत्वत द्वितीयोऽपि। क्वचिद्धि कर्मत्वं तेषां क्रियामुकम्पदृष्टं वृत्वादिति भावः। एतदेवाह प्रत्यर्थ
ति। आख्यातोपस्थापितसंख्यैकत्वावच्छिन्नस्येत्यर्थः। कर्तृकर्मेति। तथा चोभयत्रैव संख्यान्वयादेयं तत्र प्रवृत्तिति उल्ल
विस्तत्र कर्मणि प्रथमादिवस्तुनपश्यते तेन उलटस्य कर्तरि प्रथमा स्यादिति भावः। ननु कर्त्रैकत्वत्वादिना शक्त्या योग्यतैव
नियामिकेत्यत आह। कर्त्रैकत्वत्वादिनेति। अभिधेयत्वं विशेषणविधयाशक्तत्वं पद्धिवसुति विशिष्टैकत्वं कर्त्रैकत्वत्वापस
सर्गविधयाशक्तत्वात्तदमुख्यविशेष्यविधयैव शक्तत्वमयानाभ्युपेयत इत्यत आह शक्तावितिकर्त्रैकत्वादौ संबंधो
ममवाक्यार्थस्तत्व च तत्रापि शक्तिविषयत्वं। किंच ममशकवचनत्वादिनासुपतिङः साधारणसंख्यायां शक्तिः पत
वुचमाख्यातैकवचनत्वादिनाकर्त्रैकत्वादिषु शक्तित्रयं आत्मनेपदैकवचनत्वादिना कर्मैकवचनत्वादिषु शक्ति
यसुपैकवचनत्वादिनाएकत्वादिषु शक्तित्रयमितिन युक्ता क्रुयइसर्थः। शक्ततेति। ममैकवचनत्वादिना शक्तत्वेन
वचाख्यातैकवचनत्वादिनाकर्तृविहितैकवचनत्वादिनावाशक्तत्वमितिशक्ततावच्छेदकगौरवमिति भावः। तथा

पेरोव शक्तत्वस्याग्रे वक्ष्यमाणत्वात् शक्ततावच्छेदकशरीरमुभयमत एव समानमतम् आह शक्यतेति। मन्मैकत्वत्वादिना शक्यत्वे तव क
१२ र्त्रैकत्वत्वादिनेति शक्ततावच्छेदकगौरवमित्यर्थः। इदन्तु पललुक्षणाकर्त्रैकत्वत्वादिना शक्यत्वेपि योग्यताभ्रमात् कर्तृकर्मसाधारणै
नान्वयबोधो दुर्वार इत्यपि बोध्यम्। नव्यास्तु नन्वाख्यातस्यैकवचनत्वादिना पृथगेकत्वादौ न शक्तिः किंतु आख्यातैकवचनस्य
कर्त्रैकत्वेन कर्त्रैकस्मिन् शक्तिः। आख्यातद्विवचनस्य कर्तृद्वयत्वेन कर्तृद्वये शक्तिः आख्यातबहुवचनस्य कर्तृबहुत्वेन क
र्तृबहुषु शक्तिः। आत्मनेपदैकवचनस्य कर्मैकत्वेन कर्मैकस्मिन् शक्तिः आत्मनेपदद्विवचनस्य कर्मद्वयत्वेन कर्मद्वये शक्तिः आत्मनेपद
बहुवचनस्य कर्मबहुत्वेन कर्मबहुषु शक्तिः। नाद्यात्मसंबंधेन च तेषां कर्तृकर्मवाचकनाम्नामेवान्वयः केवलकर्तृकर्मशक्तित्वादि
ना वैयाकरणानां कर्तृकर्मणोरभेदसंसर्गेणान्वयनियामकस्य वास्माकमपि कर्त्रैवाहुर्नानाद्यात्मसंबंधेनान्वये नियामकत्वा
त्रातिप्रसंगस्तदवस्थ इत्यत आह कर्त्रैकत्वादिनेति कर्त्रैकत्वत्वादिनेति त्वप्रत्ययद्वयसंवलितपाठः प्रामादिकः। अभिधाने-
आख्यातस्य शक्तौ। अभिधेयत्वं शक्तिविशेष्यत्वं। नन्वत्रेष्टापत्तिः। किंतु केवलकर्तृत्वादेः शक्ततावच्छेदकत्व एव विवाद इत्यत आ
ह शक्ताविति। व्याख्याने च पूर्वोक्तन्यायमिति प्राञ्चः। वैयाकरणाः स्वमतनिष्कृष्टाहतस्मादिति अप्रसिद्धत्वेनेति। पचत इत्यत्रा
त्मनेपदेनाधिकर्तृबोधनादिति भावः। आत्मनेपदत्वेनेति। परस्मैपदेन कदाचिदपि कर्माबोधनादिति भावः। एकवचनत्वादिनेत्या
दिना द्विवचनत्वादिपरिग्रहः। एकवचनत्वादिरूपेणाज्ञानेच्छायामपीति स्वादिप्रकारकज्ञानात् तद्विना शक्तिभ्रममेकत्वादि
बोधोऽनुभवसिद्धस्तदाह तत्तद्रूपेणावेति। एवमाख्यातत्वादेः शक्ततावच्छेदकत्वाभिधानमुख्यापाततः वस्तुतस्तु प्रागुक्तं तु
न्तातिख्यादिकमेव तत्ता बोध्यम्। ननु भवतामपि संख्यान्वयबोधनियमः कथं मत आह एकेति। एकेनैवाख्यातपदेनोप १२

स्थापितत्वादि सर्थः। वाच्यगामित्वमिति। संख्याकालाद्यतिरिक्ताख्यातबोध्यात्वपित्वमित्यर्थः। तथा च विशेष्यतावच्छेदकतासंबंधे
नाख्यातजन्यसंख्याप्रकारकशाब्दबोधोत्पत्तिं प्रति कालत्वेकत्वत्वाद्यवृत्तिप्रकारतासंबंधेनाख्यातपदजन्योपस्थितेः कारणा
त्वयानान्यत्रान्वयः। चैत्रः पचतीत्यादावेकचैत्रैकपाककर्तृत्वाभिन्न इत्याद्यन्वयबोधः। अत एव सुवेकवचनेनेति इ कवचनाद्योत्यम
योरेव सार्थकतेति भावः। किं चित्तु कर्तृत्वावच्छिन्नविशेष्यतासंबंधेनाख्यातपदजन्यसंख्याप्रकारकशाब्दबोधोत्पत्तिं प्रति तत्राख्यातप
दजन्यकर्तृत्वप्रकारकोपस्थितिर्विशेष्यतासंबंधेनाख्यातपदजन्यसंख्याप्रकारकशाब्दबोधे सन्निस्थितिः कर्मत्वावच्छिन्नविशेष्यता
संबंधेनाख्यातपदजन्यसंख्याप्रकारकशाब्दं तु द्विं प्रति चाख्यातजन्यकर्मोपस्थितिर्विशेष्यतासंबंधेन कारणं तदुभयातिरिक्त
विशेष्यतासंबंधेन चाख्यातपदजन्यसंख्याप्रकारकशाब्दबोधे सत्त्वेरलीकतया यावच्छिन्नविशेषकारणवाधारे वृत्तसंख्याकाल्याहे
नसंख्यायामन्वयः इत्याहुः। ननु पश्यत इति प्रयोगस्य कर्तृकर्मोभयसाधारणतया चैत्रः पश्यते तण्डुल इत्यादौ चैत्रः पाककं
र्ता तण्डुलः पाककर्मेति बोधो ज्ञायतामात्मनेपदस्य कर्तृकर्मोभयवाचकत्वादित्यत आह कर्तृकर्मेति। बोधकत्व। स्मारकत्वं।
त्वमस्तु सत्त्वात् एकदा एकाख्यातपदविषयकज्ञानस्यासिद्धेः। पदज्ञानस्योद्बोधकविधयैव पदार्थस्मारकतया फलबलकल्पनात्
ज्ञानव्यक्तिभिन्नाख्यातपदज्ञानस्यैव कर्तृकर्मोबोधकत्वादित्यव्याख्यायां नये पि तन्न कर्तृत्वकर्मत्वबोधसम्भवादित्यादि इति भावः
चैत्रः पश्यतितण्डुल इत्यत्रापि पश्यते पदस्याहत्य कर्तृकर्मस्मारणान्न भेक इति। चैत्रः पश्यते तण्डुलमेनेणापश्यते तण्डुल इत्य
त्र सममहालयता आख्यातपदद्वयपदज्ञानस्यैकदैव कर्तृकर्मस्मारकत्वादेकस्याख्यातपदविशेषणमेव चैत्रापश्यते त्याह न चैत्र सेम
न मिसादि ष्यष्वादसैव कर्तृकर्मबोधः। यद्वा बोधकत्वमनुभावकत्वमस्तु सत्त्व। एकाख्यातपदविषयकैकज्ञानजन्यक

१३ तंकर्मोपस्थितेरसिद्धेः। पदज्ञानजन्यकर्तृकर्मोपस्थितेः शाब्दबुद्धिकारणतायां तत्तदुपस्थितिव्यक्तिभिन्नत्वविशिष्टजन्यत्वस्य संस
र्गत्वादिति भावः। न प्रयोग इति। न विना आवृत्तिं चैत्रः पाककर्त्तेति तण्डुलः पाककर्मेति बोधजनकत्वस्यार्थः। एतच्चापाततः सति ता
13 त्पर्यज्ञाने आवृत्तिं विनापि तत्तादृशबोधस्येष्टत्वादिति भावः। ननु तथापि चैत्रः पच्यते इत्यत्र चैत्रः पाककर्त्तेति बोधो दुर्वारः आत्म
नेपदस्य कर्तृत्वेऽपि शक्तत्वादित्यत आह कर्त्तरीति। असाधुत्वात्। अनाकाङ्क्षत्वात्। यगादिसमभिव्याहृतानुपूर्व्या एकतरत्राकाङ्क्षत्वाद्
मथा न्यायनयेऽपि तत्र कर्तृत्वबोधो दुर्बोधस्य दुर्वारत्वादिति भावः। चस्त्वर्थे इत्यादेर्योऽपीति न प्रयोग इति संबध्यते। न कर्तृबोधका इति
त इत्यर्थः। इष्टमुपलक्षणं। कर्मणि शानचः साधुत्वात्तण्डुलः पचते इत्यादेर्योऽपि न कर्मबोधका इत्यपि मन्तव्यम्। लाघवादाख्यातस्य यत
एकशक्तिः मुख्याभिधानानभिधानाभ्यामेव प्रथमा तृतीयादिनियमस्तत्रैव संख्यायाः कर्तृकर्मसाधारणेनान्वयबोधादि
रेवमलवाधिकाच्युतस्तामेवोद्धरति भावनेति। आख्यातार्थं भावनाविशेष्येत्यर्थः। तादृशभावनाविशेषणीभूतधात्वर्थी
दिवारणाय विशेष्येति तथा च तादृशभावनाया विशेष्यतोनान्वये यत्क्रियामकं तु एव संख्यान्वयेऽपि नियामकं विशेष्यत्वं
प्रतियोगितेतरसंबंधेन बोध्यातेन न पचतीत्यादौ नञ्ञः पचति चैत्रो जानातीत्यादौ लकारार्थस्यापि संग्रहः। वर्त्तमानत्वादेः
कृतिसाध्यत्वेष्टसाधनत्वादेरपि संग्रहः। केचित्तु कालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थो भावनेत्याहुः। तन्न। तथा सति क
र्मविभक्त्यर्थस्य फलस्यापि भावनात्वेन पच्यते तण्डुल इत्यादौ व्यभिचारभयेनायं मतान्तरानुसरणस्यासङ्गतत्वापत्तेरिति ध्ये
यम्। एकान्वापत्वस्येति। एकविशेष्यान्वयित्वस्यानुमितत्वादित्यर्थः। अनुमानप्रकारश्च आख्यातोपस्थापितासंख्या। राम
भावनाविशेष्यान्वयिनी। कालाद्यतिरिक्तत्वे न कुत्रान्वयः स्यादत आह। भावनायां चेति। प्रथमान्तपदानुपस्थाप्यस्याविधा १३

त्वर्थोद्भावनायां विशेषणत्वेनान्वयादुक्तं विशेष्यत्वेनेति। कर्मत्वाद्येति अत्र च प्रथमांतपदोपस्थाप्यत्वमात्रोपादाने तंडुलः
पचति चैत्र इत्यादौ प्रथमायाः कर्मत्वे शक्तिभ्रमेण लक्षणाज्ञानेन वा यत्र तंडुलकर्मकेसाद्विबोधस्तत्रापि तंडुले भावनान्वया
पत्तिरतः कर्मत्वाद्यनवरुद्धेति। कर्मत्वाद्यविशेषणीभूतेत्यर्थः। तेन पक्वं भुज्यते तंडुलस्य पाको भवतीत्यादौ पाककर्मत्वेन तंडुल
कर्मत्वादिविशेष्यत्वे न्वयो नानुपपन्नः। कर्मत्वादिपदे च स्वरूपकथनमविशेषणत्वमात्रं विवक्षितम्। अत एव यदि साक्षात्पर
परासाधारणैकवृक्षारंभकावयवे साक्षात्परंपरासाधारणपंचनौकानिरूपिताश्रयत्वप्रकारकान्वयबोधे वक्तुरभिप्राय
तदा एको वृक्षः पंचनौका भवतीत्येव प्रयोगो न तु भवंतीति प्रयोगः। तत्र नौकायाः प्रथमार्थनिरूपितत्वविशेषणतया तत्र भाव
नान्वयासंभवेनाख्यातार्थसंख्यान्वयासंभवाद्यद्य च पंचनौकासु वृक्षनिरूपितानामाश्रयत्वप्रकारकान्वयबोधे वक्तुरभि
प्रायस्तदा तु भवंतीत्येव प्रयोगः। प्रथमस्य साक्षात्परंपरासाधारणत्वस्योपादानात्साक्षाद्वृक्षारंभकमहावयवानां ना
नेपि न क्षतिः। द्वितीयस्योपादानात्साक्षात्परंपरया वृक्षारंभकताश्रयाणामेवाखंडावयविनां साक्षान्नौकारंभकत्वेपि
क्षतिः। केचित्तु एकवृक्षपदं परम्परया वृक्षारंभकारंभकपरं धातुश्च साक्षादारंभकतापर एव यद्वा नौकापदं साक्षात्त
दारंभकपरं भूधात्वर्थश्चाभेदस्तु। नौकायाः समुदायस्यावयविभ्रमवशात्तुरूपत्वेन तु नौकापदं तादृशविलक्षणसंयोगवत्पर
मिसलमप्रकृतेन। नचैवं भूतले घटो नास्तीत्यादौ घटस्याभावविशेषणत्वात् तद्धर्माश्रयत्वस्याभाव एवान्वयाद् घटे संख्या
न्वयोपि तस्या इति वाच्यं। सुसत्तिवैचित्र्येण तत्र भावनाविशेष्यप्रतियोगिन्येव संख्यान्वयात् तत एवानुपपन्नविशेषणा
नासंबंधेन भूतलवृत्तित्वाभावस्य प्रतियोगितासंबंधेन भूतलनिष्ठाभावस्य घटे विशेषणतयैवान्वयानुपगमाच्चेति भावः

धात्वर्थकृतिसाध्यत्वेष्टसाधनत्ववर्त्तमानत्वादीनामपि कर्मत्वाद्यनवरुद्धतयातत्रत्यान्वयवारणाय प्रथमान्तपदोपस्था
१५ प्येति। तथा च तद्विशेष्यकभावनाप्रकारकत्वान्वयबोधे तदुपस्थापकपदे प्रथमाविभक्तिसमभिव्याहारो धात्वर्थसाराख्यातवाक्यं
ख्यातस्य च तत्तुल्यविशेष्यकभावनाप्रकारकत्वाद्धेतुत्वेर्य सत्वेरव्यत एव। अत एवायमेव ह्रस्वपतेःसाधुर्वेवृकारर्थोम्य विशेषणा
15 त्वेनोपस्थितस्य भावनाविशेष्यत्वेनान्वयो नानुपपन्नः। ननु तथापि चैत्रः पचतः चैत्रः पचती साधो चैत्रादि मुकपुत भावनान्व
यः। न चाख्यातप्रथमयोर्वचनसाम्यस्यापि तन्त्रत्वमिति वाच्यम् चैत्रो मैत्रश्च गच्छतः साधोऽभिचाराद्दिमिवं। आख्या
तैकवचनोपस्थाप्यस्य यत्ताहेः प्रथमैकवचनातोपस्थाप्यएवान्वयाः तद्विवचनोपस्थाप्यस्य भावनाहेः द्विविद्विवचनातोपस्था
प्यैकत्वादिकवचनान्तरयोपस्थाप्येष्वीत स्फपगमाहेवमन्यत्रापि स्वत्वेकस्याकुपाहेयत्वादिति भावः। केचित्तु ह्रस्वपते चैत्रः पचतीत्य
त्र तिचैत्रः पचती साधाविकत्रह्रयबुद्धेकाख्यातार्थमुद्देश्यपतावच्छेदकाख्यापराख्यातार्थान्वयवारणाय कर्मत्वाद्यनवरुद्धेति
आख्यातोपस्थाप्यकर्मत्वाद्यविशिष्टेसर्थः। तेन पच्यते तण्डुलस्य पाकोभवती साधो पाककर्मकत्वतण्डुलकर्मकत्वादि
मतिभावनापास्वन्वयो नानुपपन्नः। न वै वंभ्रस्कदे ह्रस्वकर्मागेहानविषयत्वतात्पर्ये एगप्रयुक्ते ध्वतिः स्वाहाहायतः स्वाहाव
न्वयापत्तिः। तत्र प्रथमापदमेव चतुर्थ्यर्थस्य लक्षणिकतयात्तद्वत्तथत्वेप्याख्यातोपस्थाप्यतद्वत्त्वाभावादिति वाच्यम्।
दृष्टत्वात्। अमथ्यप्रथममतेप्यप्रतीतकारात कृतिसाध्यत्वेष्टसाधनत्वादावुकर्मक्रियायां धात्वर्थे च तद्न्वयवारणाय प्रथ
मान्तपदोपस्थाप्येति। तथा च तद्विशेष्यकभावनाप्रकारकान्वयबोधे पूर्वोक्त द्वयमाकाङ्क्षायथा तु स्वीतानाघृघटार्थे
मुद्देश्यपतावच्छेदकीकृत्य घटार्थप्रकारकान्वयबोधोऽनुभवसिद्धः तत्र हनुप्रवीतानस्य विशिष्यता ह्रस्वान्वयबोधे हेतुतया १४

इष्यते चैत्रः पचतीत्यादौ चैवं न तथान्वय इति भावः इत्याहुः । ननु प्रथमान्तपदोपस्थाप्यस्य भावनायां विशेषणत्वेनैव कुतो नान्वय इत्यत
त आह तथैवेति । विशेष्यत्वेनैवेत्यर्थः । बोधस्येति शेषः आकांक्षितत्वात् । आकांक्षायाः कार्यत्वात् । चैत्रः पचतीति । तथा चेत्या
दिना । नन्वेवं भावप्रत्ययस्थले भावनाविशेष्यविरहात्संख्यान्वयो न स्यादित्यत्रेष्टापत्तिमाह । चैत्रेणेति । इत्याह । विति । भावनावि
शेष्यविरहात्संख्यान्वितत्वेन वेसेतनेनान्वयः । भावनाविशेष्यविरहे हेतुद्वयमाह प्रथमान्तेत्यादि । ननूपस्थितभावनाया
अनन्वयापत्तिर्दोषेणाभावातिरिक्तस्थल एव प्रथमान्तपदापेक्षा । भावस्थले तु धात्वर्थ एव भावनाविशेष्य इत्यत आह । धात्वर्थस्ये
ति । ननु अन्वयस्य तादृशाकांक्षानिवृत्तिरपि भावप्रत्ययस्थले त्वन्यतामित्यत आह भावनाया इति । चैत्रवृत्तिस्वापनिरूपिताश्रयत्वा
देव महत्त्वे भावनात्वेन तत्र धात्वर्थस्वापस्थित्यादेर्बाधादित्यर्थः । एतत्प्रख्याततः निरूपकत्वसंबन्धेनैव तत्र स्वतन्त्रान्वयसंभवा
त्तावत्कृतो । चैत्रे चैत्रनिष्ठः स्वापः गगननिष्ठा स्थितिरित्यादावाख्यातार्थविशेषणकान्वयबोधस्यैवानुभवसिद्धत्वाद्धात्वर्थेन भावना
विशेष्यमित्येव न तत्त्वाय द्वैतद्वारसे नैवान्य अत एवेति । धात्वर्थे भावनायामन्वितत्वेन संख्याया अपि तत्रान्वयादित्यर्थः ।
औत्सर्गिकत्वादित्यन्वयबोधासंभवस्थल एवापवादः । औत्सर्गिकं प्रथमोपस्थितमित्यपि कश्चित् । नन्वेवं भावप्रत्ययान्ता
तिरश्चीकत्वापत्तिः चैत्रेण सुप्यते गगनेन स्थीयते इत्यादौ चैत्रनिष्ठस्वापाश्रयत्वं गगननिष्ठस्थित्याश्रयत्वमित्यादिबोध
स्याऽनुभवबाधितत्वादित्यत आह एवं चेति । यथा यथमिति । क्रमेण वर्तमानत्वमिष्टसाधनत्वं लिङ इत्यर्थः । वर्तमानत्वादीत्या
दिपदद्वयेनातीतत्वभविष्यत्त्वपरिग्रहः इष्टसाधनत्वादीत्यादिपदात्कृतिसाध्यत्वादिपरिग्रहः । नन्वेवं प्रथमान्तपदाभावात्तस्यान्वि
तत्वापत्तिरित्यत आह । तच्चेति । जानातीत्यादौ धात्वर्थेऽपि वर्तमानत्वादीनामन्वयादिष्टसाधनत्वादीनां च धात्वर्थ एव

मर्थेनान्वयादिति भावः। नन्वाख्यातार्थस्य धात्वर्थविशेष्यतानियमात्कथं तद्विशेषणत्वेन तस्यान्वय इत्यत आह तथैवेति। ए
१५ षां धात्वर्थविशेषणत्वेनैव प्रत्ययादित्यर्थः। तथा च भावनाया एव धात्वर्थविशेष्यतानियम इति भावः। तद्बोधकानां वर्त्त
15 मानुत्वादिष्टसाधनत्वादिबोधकानां। घञादीनां भावविहितघञादिना। प्रयोगसाधुत्वमात्रमिति। प्रयोगः सुंदरः पाक इ
त्यादौ पाकविशेष्यकान्वयबाधस्तत्राकांक्षात्वमात्रमित्यर्थः। मात्रपदात् सार्थकत्वव्यवच्छेदः। घञादीनामिमादिपइत
भावविहितल्युडादीनां भावविहितक्तिप्रत्ययस्यैव संग्रहः। भावविहितेत्युपादानात् करणादिविहितघञादीनां कर्मवि
हितक्तिप्रत्ययस्य च सार्थकत्वेपि न क्षतिः। न च कर्मणि क्तिप्रत्ययो सिद्धस्तस्य भावएवाद्वाऽशिष्टत्वात्। यामसाद्धि स्पष्ट राधा इति
श्रभिन्नानपद्येद्विपदस्य भावसाधनत्वेपि कर्मण्यभिहितेति मायेनऽपसत्तेन कर्मकलाभसंभवादिति वाच्यम्। इष्टाविषये यिपदद्धि
पदप्रयोगस्य दृष्टतया भावस्य कर्मण्यपि तस्य साधुत्वात्। न च तत्र एतत्प्रयोगः काप्यदृष्ट इति वाच्यम्। अग्रये स्विष्टिकृते त्वा
हेति स्विष्टिकृद्धोममन्त्रे तथाश्रुतेर्नान्नस्य कृशोऽभवेच्छाविषयकत्वे प्रयोगेस्य सार्थकत्वात् याज्ञासानाकेषां व्याख्यातत्वात्। न च तत्र स्वि
हेति निष्ठात एव पाठ इति वाच्यम्। बहुविकारान्तपाठस्यापि दृष्टत्वात् अव याज्ञजनविषयेपि कृति घृद्धक्ति पदप्रयोगाद्बोधकर्म
वाचकपदप्रभावेन क्रमभिहितेति स्यायस्य तत्रासंभवादिसलमप्रकृतेन। ननु यदि भावनाविशेष्य एव संख्यान्वयस्तदा प अतेतं
इलइत्यादौ तेङ्लादिषु कथं तदन्वयः। तत्राप्रयुक्तासंबंधेन भावनाया बाधितत्वेन भावनाविशेष्यत्वाभावादित्यत आह
भावनायाश्चेति। आश्रयत्वेन। आश्रयतासंबंधेन। कर्मणीति। कर्मप्रत्ययस्थल इत्यादिः। अन्यथा वक्ष्यमाणकर्मणा। एम
तथा वाप्रयतासंबंधेन भावनाया बाधेपि प्रकारान्तरेणाविशेष्यत्वे नयाधकमिति भावः। नेड कचिदाश्रयतासंबंधेनक १५

नोर्यन्वयः कश्चिच्च कर्मणि अन्यथाऽन्वयइत्यत्र किंतियामकमित्याह तत्त्वेति तत्र आख्यातस्य कर्तृकर्मबोधकत्वतुल्यं समाप्या
ख्यातस्य कर्तृयोग्यतया भावनान्वयबोधकत्वं कर्मणश्च यथा तदन्वयबोधकत्वमित्यर्थः। तथा चयथाख्यातेपरस्मैपदस्य न
कर्मबोधकत्वं किंतु कर्तृबोधकत्वं तथात्मनेपदस्यापि परस्मैपदस्य न कर्मणि भावनाया अन्वयबोधकत्वं किंतु कर्तृयोग्यत्वेन त
द्बोधकत्वं यथा तद्धुकर्त्तरि यक्तो साधुत्वं तथात्मनेपदस्यापि कर्तृयोग्यत्वेन भावनान्वयबोधे न स्यात्साधुत्वं यद्यात्तव एकह
न कर्तृकर्मबोधकत्वे तथात्मनेपदे कदाकर्तृयोग्यत्वेन कर्मणि चान्यथान्वयबोधकत्वमिति भावः। क्रमेण संकीर्णप्रया
जनमाह मैत्रेयान्वयात्तत्र प्रथमा स्यादिक करोभयान्वयबोधकत्वस्याप्युपपन्नत्वात् यामैत्रेणाश्रयतया भावनान्वयात्तद्वृत्ति
संख्यायास्तत्र प्रथमा स्यादित्येकाभयान्वयेव अप्यनभिधानात्तत्र तृतीया स्यादिति भावः। तण्डुलमिति। कर्तरि द्वित्वाश्रयत
या भावनान्वयबोधेपि यक्तः साधुत्वं पचतेः सामान्येन पुष्टेन कर्तरि मैत्रेते न सम्बन्धेन भावनायामन्वयबोधनात्तदर्थसंख्यापा
अपि तच्चैवान्वयात्तत्र प्रथमा स्यात्। एकहीभयान्वयबोधकत्वस्याप्युपपन्नत्वात् तण्डुले भावनाया विषयत्वेनान्वयात्तद्वृति
संख्याया अप्यनभिधानात्तत्र द्वितीया स्यादिति भावः। मैत्र इति। एकहीभयान्वयबोधस्याप्युपगमे पदेषेतरत्वेन भाव
नायाः कर्तृयोग्यतया कर्मणि चान्यथान्वयबोधनात्तदुभयवृत्तिसंख्याया अप्यभिधाने नोभयत्रैव प्रथमा स्यादिति भा
वः। आख्यातार्थभावनाविशेष्ये संख्यान्वयस्तत्र भावनापदार्थ इति वृत्तिभावनाचेति। भावनानन्वयत्वाद्विशेष्यमात्र
मपि तु व्यापारत्वविशिष्टमपीत्यर्थः। आपारत्वधर्मत्वं। अचेतनेति। अर्थः पचतीत्याहवचेतनेनेपि संख्यान्वयानुरोधादि
त्यर्थः। आश्रयत्वं प्रतियोगित्वमपीत्यपि बोध्यं। नादेकस्यानुपादेयत्वात् तेन न चैत्रो जानातीति घटेन च पतीत्यादे रपि अ

संग्रहः। केचित्तु व्यापारोपलक्षिते सस्य कालेष्टसाधनताद्यतिरिक्ता ख्याताथोंपलक्षिते सर्थ इत्याहुः। तद् मतानथा सति क
१६ र्माख्यातार्थस्य फलस्यापि भावनात्वेनाप्यिमग्रंथसंगतेः। वैयाकरणानाख्यातस्य कर्तृकर्मणोर्वाचकत्वे चैत्रादिपदाख्यातपदयोः
16 सामानाधिकरण्यामथानुपपत्तिः प्रमाणं। हृतं तं निराकरोति। विभिन्नाभ्यामिति। एकधर्मिबोधकत्वमात्रस्य सामानाधि
करण्यपदार्थत्वे कलत्रादिपदे पि घटादिपद सामानाधिकरण्यव्यवहारापत्तिरतो भिन्नाभ्यामित्युक्तं घटोस्ति नी
लमानयेति वाक्यद्वयस्थलीयनीलपदघटपदयोरपि सामानाधिकरण्यव्यवहारस्येष्टत्वात्। एतच्च सामानाधिकरण्य
पदार्थतयाभिहितं। ननु कर्त्रादिशक्तिसाधकहेतुघटकं वैयधिकरण्यमवधेयम्। तत्र स्याहन्नामिति। अत्राख्यातपदं चैत्रादिपद
योरेकाधिकरणवृत्तित्वरूपमित्यर्थः। न बाध्यते कर्तृत्वादिना ज्ञानबाध्यते कर्तृत्वादिना तादृशुपपद्यन इति यावत्। केचित्तु
असाधुत्वं यत्राख्यातेन कृतिर्बोध्यते तत्र चैत्रादिपदे नापि चेत्तदा हि कं बोध्यत इत्येवंरूपमित्याहुः। कर्मणि पुनरस्यार्थस्य
घाताद्यर्थबोधयितुं शक्यते यत इति। कथमिति। केन संबंधेन भावनाविनाविशेष्यमस्त्यर्थः। उत्तरयति विषयतयेति। इत्तरं निरा
करोति। रथ्येनेति। का गतिरिति। कथमाख्यातोपस्थितायागमनाद्यनुकूलव्यापाररूपायाभावनाया विशेष्यायामारि
सर्थः। तत्र गमनानुकूलव्यापारस्य नोहनाहे विषयाप्रसिद्धेरिति भावः। मैत्रनिष्ठेति। अत्र निष्ठत्वं तत्तीयार्थः। साचाख्या
तार्थभावनान्वयि नो विषयत्वसच्च विषयत्वसंसर्गः प्राकाकर्मणापितंडुलेतंडुलत्वरूपेण मैत्रनिष्ठपाकभावनाविष
यत्वस्य सत्वात्तत्रापि मैत्रेण पच्यत इति प्रयोगप्रसंगात्। कर्माख्यातस्थले फलवत्ताप्रतीतिरेडवाभिस्तत्वाद्वाह। राम
मैत्रनिष्ठेति। अत्रापि निष्ठत्वं तत्तीयार्थः। भावनाख्यातार्थः। ननु निष्ठत्वसंसर्गः भावनातत्तीयार्थः समानपदोपा १६

त्त्वेनाख्यातार्थभावनाविशेष्य एवं तदर्थस्याख्यातत्वप्रवृत्तिनिमित्तत्वप्रसक्तिभंगापत्तेः। भावनाविषयत्वे तु भावनाविषय
कभावनाजन्यत्वमिति यावत्। अन्यथा पाकत्वरूपेणाभेदप्रकारकप्रतीतिविषयत्वेन तिष्ठत्सतिजन्यपाककर्मण्यपि तण्डुले मैत्रेणाप
च्यते इति यन्ते तण्डुल इति प्रयोगापत्तेः। फलमपि कर्माख्यातार्थः फलत्वकार्यत्वप्रतियोगितासंबन्धेनाभावादिमत्त्वमिति या
वत्। अत एव व्यापारत्वेनाभेदः। जन्यत्वं शालित्वं च संसर्गः। पचमानो ह्स्वार्थद्वयपुरितप्रद्योतनावबोधकत्वप्रसक्तेश्चात्र
नादरः। स्वर्गकामो यजेतेत्यादौ विध्यर्थेष्टसाधनत्वप्रकृतिभ्यां पुरितस्य धात्वर्थस्य घटो भविष्यतीत्यादिव्याख्यानार्थवत्तेमा
नाभावप्रतियोगित्वाश्रयत्वाभ्यां तु टितस्यापि तिरूपधात्वर्थस्य चान्वयानुपगमेन तदनुपपत्तेः स्वार्थविकत्वादित्यभावः। त्वे
वमाख्यातार्थभावनात्वविशिष्टविशेष्यः कार्ये तण्डुलः भावनात्वस्य प्रयत्नत्वव्यापारत्वादिरूपतया फलत्वस्यापि तथात्वादि
त्यत आह साक्षादिति। पूर्वं च साक्षाद्वृत्तस्य परंपरया इत्यर्थः। रथस्तिष्ठतीति। अत्रापि शालित्वजन्यत्वे अनुकूलत्वं संसर्गः।
फलस्य व्यापारजन्यत्वं धात्वर्थद्वारा तत्प्रयोज्यत्वं। निष्ठत्वं तृतीयार्थः। अन्वयस्तस्य धात्वर्थे गमने न तु व्यापारे। अन्यथा
यथा ग्रामगमनानुकूलनोदनादिप्रतिनिष्ठले परस्थे अनेन रथेन गम्यते ग्राम इति प्रयोगापत्तेः। अत एव प्राणिवरस्थितिह
व्यापारजन्यगमनजन्यस्य फलस्य शालीयामृ इत्यन्वयो नोक्तः। व्यापारविशेष्य इति। परंपरया व्यापाररूपाख्यातार्थभावनाविशे
ष्य इत्यर्थः। आचार्यमते तद्व्यापाराभिधानपूर्वकमन्नानन्तर्माहनव्यास्तिति। भावनाप्रयत्नः। आदिपदग्राह्यव्यापारत्वविशिष्टपरिग्रहः
संख्यामात्रं वेति। चैत्रेणापक्वं तण्डुलमाहाविस्मादिः। संबध्यते निष्ठतारूपसंबंधस्तु। वा अर्थः। संसर्गमर्यादयालभ्यः। रथेन
गम्यतइत्यादौ पुनराधेयत्वं तृतीयाविभक्तेरेवार्थः। धात्वर्थनामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात्। न चैत्रेणापक्वस्तण्डुल इत्यत्राधेय

१७ त्वस्य संसर्गत्वे चैत्रः पच्यते तण्डुल इत्यादावपि तथा स्यादिति वाच्यम्। तादृशान्वयबोधे तृतीयायाः सहकारित्वात्। चैत्रेण पच्यते तण्डुल इ
त्यादौ द्वितीयाद्युपस्थिताधेयत्वान्वयबोधाभावेन तृतीयाप्राधेयत्वे तृतीयोपस्थाप्यत्वस्य नियामकस्यावश्यवक्तव्यत्वादिति भा
वः। फलकर्मेति संबंधः शालित्वरूपसंबंधः। तथा च वाक्यार्थः। अपि चाकात क्रियाफलयोर्व्यापारफलयोः समुच्चयः। तत्रापि जन्यत्व
स्यैवाकांक्षत्वात्। नचेति। तद्रूपि फलमपि। तथा संसर्गः। तथा च मैत्रनिष्ठपाकभावनाजन्यतण्डुल इत्यादिरन्वयबोधः स्वजन्यफलवत्त्व
स्वविषयक्रियाजन्यफलवत्त्वं वा संबंधः। ननु मैत्रनिष्ठभावनाविषयपाकवान् तण्डुल इत्यन्वयबोधः। अतो धात्वर्थनामार्थयोर्भेदेनान्व
यस्याव्युत्पन्नत्वेऽपि न क्षतिरिति भावः। ननु फलावच्छिन्नक्रियाया धात्वर्थत्वात्धात्वर्थ एव फलमित्यत आह फलावाच्छिन्नेति विशेषेति संयो
गाद्यात्मकफलविशिष्टेत्यर्थः वैशिष्ट्यं च जन्यजनकभावः। क्रियाजन्येति। पच्यते तण्डुल इत्यादौ पाकजन्यफलशाली तण्डुलः रथेन
गम्यते ग्राम इत्यत्र रथनिष्ठगमनजन्यफलशाली ग्राम इति बोधस्यानुभवसिद्धस्याभावप्रसङ्गादित्यर्थः। विशेष्यतया विशेष्य
भावेति। यद्रूपविशिष्टे वृत्तिग्रहः तद्रूपविशिष्टस्यैव पदेन बोधनादिति भावः। इदमुपलक्षणम्। धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयस्या
व्युत्पन्नत्वादितरविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयस्याव्युत्पन्नत्वाच्च धात्वर्थैकदेशस्य फलस्य कर्मणि सा
क्षादन्वयासंभवात् फलत्वेन फलालाभप्रसङ्गाच्च। विक्लित्तित्वसंयोगत्वादिरूपेण फलस्य धात्वर्थतावच्छेदकत्वादित्यपि बोध्यम्।
आत्मनेपदार्थ इति। एतावत्पर्यन्तं प्राचीनमतं विवेचितं। तद्दूषयति। इत्थं वेति। भावनायाः यत्नस्य। एतच्च पच्यते तण्डुल इत्या
दौ न तथा च तत्र पाकविषयकक्रियाजन्यफलशाली तण्डुल इति बोध इति भावः। ननु भावनैव धात्वर्थे विशेषणीभूय भासते तथा
च भावनाविषयपाकजन्यफलशाली तण्डुल इत्येवान्वयबोध इत्यत आह भावनेति। भावनाया मुख्यविशेष्यत्वाकाले इष्टसाधकत्वाघति

राम
१७

17

त्यार्थे। अन्यत्रेति। पचतीत्याहेत्यर्थः। अन्वयः अन्वयबोधनियमः। न च क्रियायाः फले भावनायां ऽभयत्रैव विशेषणमस्यान्व
यो॰। न तु क्रियावत् तद्विषयकभावनापि जन्यतासंबन्धेन फले विशेषणम् फलं च तण्डुले विशेषणमस्त्विति वाच्यम्। तादृशबो
धस्यापि तत्रानुभवसिद्धत्वादिति भावः। भावकर्मेति। चैत्रेणाय कं चैत्रेणापक्वोऽयमोदन इत्याहेत्यर्थः। सुपः। विभक्तितः। तथा च
चैत्रैवजन्मत्वसंबन्धः तण्डुलपदं च तण्डुलावयवपरं। तेन विक्लृत्तिरूपस्य फलस्य तण्डुलादिष्वपि न क्षतिः। एवमोदनः पच्यते इत्या
दावोदनादिपदमपि बोध्यम्। न चैवं तथापि यत्रावयवविक्लृत्तिरूपफले नोत्पन्नं तत्रैतद्वाक्यस्यायोग्यत्वापत्तिरिति वाच्यम्।
इष्टत्वादिति भावः। ननु कृतेः क्रियाविशेष्यत्वमेवेति कुमनुते॰ कथमेतदित्यत आह। सुबर्थेति। सुसमन्वयादिति वैशेषिकपक्षमित्या
देतुस्य सत्त्वादित्यर्थः। तथा च तिङर्थकृतेरेव तद्यत्वमिति भावः। नियमादिति। भावारे॰ सहकारेणेव कृतेः यकः सहकारेणेव फ
लस्य सार्वधातुकेनाभिधाने युगपत्कृतिफलयोरभिधानेच्छ्ना एवातस्माद्वेत्येतिनियमादित्यर्थः। नातिप्रसङ्ग इति चैत्रः पच्य
ते इत्यादौ कृतेः तण्डुलः पच्यते इत्यादौ फलस्य न प्रसङ्ग इत्यर्थः। प्रयोगा अयुगपत्कृतिफलबोधकाः। न चैवं कर्माख्यातेन
भावनाया अनभिधाने आख्यातार्थभावनाविशेष्यत्वस्य तदर्थे संख्यान्वयात् नियामकत्वात् तत्र किं नियामकं स्यादिति चेत् आ
ह तिङ्॰ उपस्थापितायाः कृतिभावनाया एव। कर्त्राख्यातार्थभावनाया एवास्य धर्मा इति। तथा च यथा कर्त्राख्यातार्थभावनान्वये
कर्मत्वाद्यन्वयस्तथा कर्मत्वापि उपस्थितार्थभावनायास्तदपि तिङर्थसंख्यान्वयेऽपीति भावः। एतच्च प्राचीननयानुरोधेनोक्तं
तत्राख्यातार्थभावनाविशेष्यत्वमेतदर्थसंख्यान्वये इति नियमे यत्नव्यापारत्वविशिष्टस्यैव वर्तमानत्वादेरिष्टसाधनत्वादे
नराख्यातप्रतिपाद्यतावच्छेदकधर्मवत्त्वरूपभावनात्वविशिष्टत्वरूपेण फलत्वविशिष्टस्याप्युपलक्षकं। तथा च भावनात्ववि

१८ शिष्टविशेष्येण संख्यान्वय इत्येव नियमोऽस्माय इति बोध्यमनन्येवं कर्तृकर्मणी कृतोऽपि गौरवेण स्वानां तथापि लाघवेन कृतिफलयोरेव
शक्तेः कल्पितत्वात् इत्यत आह चैचोगन्तेति । कर्तृकर्मणोर्बोधयत्वेऽपि शक्तिव्यवस्थापनाय कर्तृकर्मभेदेनोदाहरणद्वयम् । न च एकधर्मि
18 बोधकत्वरूपसामानाधिकरण्यमसिद्धं तत्र चाहितोऽप्रसक्तयत्तथाभेदान्वयोपपत्तेरिस्तु समानलिङ्गकत्वरूपसामानाधिकरण्यं
प्रमाणमपि तु कर्तृकर्मशक्तिसाधकमुदाहरणद्वयमाह मित्रेति । न च समानलिङ्गकत्वं कुत्र धर्मिशक्तिसाधकमिति वाच्यम् ॥ अभेदान्व
यबोधे समानलिङ्गकत्वस्यातन्त्रत्वात् । न वा अभेदान्वयेऽपि समानवचनत्वं वा तन्त्रम् समानलिङ्गकत्वमपि न तन्त्रं वेदाः प्रमाणमित्यादौ ज्ञानस्य
सतिव्यत्ययस्तुपदार्थ इति न्यायसूत्रे चोभयोरेव व्यभिचारादिति वाच्यम् । अजहल्लिङ्गस्यापि न तन्त्रं वेदाः प्रमाणमित्यादौ ज्ञानस्य सतिक
कृयस्तुपदार्थ इति न्यायसूत्रे चोभयोरेव व्यभिचारादिति वाच्यम् । अजहल्लिङ्गेऽभेदान्वयबोधे तदुभयोरतन्त्रत्वेऽपि न हि तिरिक्तस्थले
तदुभयोरेव तन्त्रत्वादिति भावः । ननु लाघवेन कृतेः सति फलयोः शक्तौ सुसङ्गतेऽपि चैत्र ओदनं पचतीत्यत्र अभेदान्वयबोधेऽपि समानलिङ्गकत्व
स्योपयोगोऽभूद्विषयत्वात्मत आह भोक्तेति कृतिफलयोः कृतः शक्तत्वे अन्वयबोधेन स्यात् कृतेः तदुपाश्रयत्वस्य भोजनेऽपाकफल
विक्लित्तिकर्मत्वस्य बाधादिति भावः । एतदपि कर्तृकर्मसाधनायोदाहरणद्वयं कृतेः कृतौ वाच्यत्वे कृदर्थकर्त्रा रख्यात स्यात्
यत्वस्यान्वयानुपपत्तिमभिधाय तत्र कर्मार्थमाताध्यं स्वफलस्यान्वयानुपपत्तिं दर्शयति पक्तीति । सामानाधिकरण्यापादितस्यापि
धातोः भोक्तान्वयितास्याहो प्रमात्मकान्वयबोधस्य परिग्रहः । कर्तृकर्मणी कृत्ये इति । कर्त्ता ज्ञातानपूर्व्यस्याहेवत् जाहेराश्रयस्य
तियोग्याहोति । रूढलक्षणानवसमवायित्वलक्षणाश्रयत्वस्य कृतिमत्वादिरूपकर्तृत्वादिकमपेक्ष्य लघुतया तस्यैव वाच्यता
वच्छेदकत्वमिति वाच्यम् । तस्य लघुत्वेऽपि तज्जातिरिक्तप्रतक्रकारकबोधे पुरस्कारसिकत्वाभावस्य सामाणिकोऽनुभवसिद्धतया शक्यताव
१८

19
पारवाचित्वं न मुख्यसकर्मकत्वं। किंतु फलवाचकत्वमेव मुख्यसकर्मकत्वं। तथा च वस्त्रसृजि प्रभृतेरपि मुख्यसकर्मकत्वापु
त्तिरत आह धात्वर्थेति। महीरुहाद्धाविति। श्येन कर्मजनितश्येनसंयोगवति महीरुहाद्धावित्यर्थः। ननु महीरुहः संसृज्यते
इत्यत्र वाधेन व्यापारानभिधाने विशेषेण संसृज्यत इत्यत्र व्यापाराभिधानमस्तु वाधाविरहादित्यत आह। संयोगत्वमात्रेति।
संयोगाश्रयत्वमात्रेत्यर्थः। न तत्र प्रत्ययस्य व्यापारवाचितेति। किंतु यथा यथा भाश्रयत्वमाश्रयस्य प्रत्ययार्थ इति भावः। न
सकर्मकत्वमिति तिन्मुख्यसकर्मकत्वमित्यर्थः। तथा च यत्र यत्र प्रयोगे न व्यापारो वोध्यते तत्र न्द्धातुरेव मुख्यसकर्मकः॥
अनुगतसकर्मकत्वानिरुक्तावपि न्हतिविरहादिति भावः। ननु तथापि संयोगरूपाद्यो घटादिना व्यापाराभिधाना
त्सकर्मकत्वं तस्य दुर्वारमत आह संयोगेति। प्रयोगेति। प्रयोगस्याधुतामात्रमिति। धातुना संयोगवोधने आकांक्षा तन्मात्र
मित्यर्थः। यत्नानानुभवेति। यत्नत्वविशिष्टाननुभवे इत्यर्थः। यत्नत्वं। प्रवृत्तित्वं। व्यापारवत्त्वस्यैव तन्मते आख्यातशक्यतावच्छे
देकत्वादिति भावः। ननु तत्राख्यातस्य यत्नलक्षणायैव तथानुभवो भविष्यतीत्यत आह फलेति। फलवतीत्याद्रेरिति। प्रयो
गप्रसंगादित्यग्रेतनेनान्वयः। ननु आश्रयाधारणानुकूलत्वस्य संसर्गत्वान्नायं दोष इत्यत आह विभागेति। न च तत्राख्या
तस्याश्रयत्वमेवार्थ इति वाच्यम्। विभागरूपफलस्यैव तन्मते धात्वर्थतया तदाश्रयत्वस्याख्यापितत्वसत्वात्। फलावच्छिन्न
व्यापारस्य धात्वर्थत्वे तु विभागानुकूलस्य दृश्यैव त्यजधात्वर्थतया तदाश्रयत्वस्याख्याता[illegible]स्य तत्राभावान्न तत्प्रसंगः। न च व्या थे३
ख्यातस्य स्पंदत्वादिरूपेणैव व्यापारे शक्तिरिति वाच्यम्। धातोर्नानार्थस्यापादशपदतया आख्यातस्यापि तत्कल्पनायां गौ
रवादिति भावः। एतद्व्यापानतः क्रियामां माद्दशं विभागाद्यनुकूलत्वं तस्यैव तन्मते धात्वर्थस्याख्यातार्थव्यापारे

९९९